विषय-सूची

वटवृक्षः ।

अहो वटवृक्षोऽप्येको विचित्रस्तरुर्भवति,
तं महच्छत्रमिव दृश्यते । अत्र प्रभोर्जगदी-
श्वरस्य प्रभुत्वं ज्ञायते यदणुमात्रबीजादेता-
न्महान्वटवृक्षो जायते । तत्प्रकाण्डाद्वि-
शाला विस्तृताश्च स्कन्धास्तिर्यक् प्रसरन्ति ।
स्कन्धेभ्यश्शाखाः, शाखाभ्यः प्रशाखा उद्ग-
च्छन्ति । अतएवायं वृक्षो न्यग्रोध इति कथ्यते ।
स्कन्धेभ्यश्शाखाभ्यश्च जटा निस्सृत्यावलम्बन्ते ।
काले वृद्धिं गत्वा भूमिं स्पृशन्ति, प्रविशन्ति च ।
तत्र प्रविश्य पादपतां भजन्ते । शनैश्शनैः

पिप्पलपत्राणि सदा चलन्त्येवासते, अतएव स चलदल इत्युच्यते । पिप्पलस्यापि छाया शीतला भवति । तत्रापि लोकः सुखमनुभवति । किन्तु वटच्छायातुल्यतां न प्राप्नोति । पिप्पले वटस्येव जटास्तम्भा अपि न भवन्ति । अतएव प्रकम्पनो लीलयैवैनमुन्मूल्य पातयति । इयानेव वटपिप्पलयोर्भेदः ।

टिप्पनी—अध्यापकश्छात्रान्तस्पुरुपसमासं शिक्षयेत् । एतत्पाठान्तर्गतानि तदुदाहरणानि च दर्शयेत् ॥

द्वितीयः पादः।

वाहनानि।

आसन् प्राचीनकाले वाहनानि अश्वरथः, गोरथः, गजः, शकटः, शकटी, घोटकः, डेनकः, शिबिका च। राजानो महामात्याश्चाश्वरथैर्गजैश्च यात्रां कुर्वन्त आसन्। श्रेष्ठिनो महाजना धनिकाश्च पुष्परथैः शकटैः शकटीभिश्च चलन्ति स्म। अनुचराः स्त्रीजनश्च प्रायः शिबिकां गोरथं वारुह्य गच्छन्तोऽभूवन्। योद्धारः सैनिकाश्चाश्वारूढाः स्यन्दनस्थाश्चाभियान्ति स्म। द्विजैर्गैः प्रायो देशान्तरयात्रा क्रियते स्म। सामान्य जनास्तु पद्भ्यामेव जग्मुः।

द्वितीयः पाठः ।

वाहनानि ।

आसन् प्राचीनकाले वाहनानि अश्वरथः, गोरथः, गजः, शकटः, शकटी, घोटकः, वेसरः, शिविका च । राजानो महाराजाश्चाश्वरथैर्गजैश्च यात्रां कुर्वन्त आसन् । श्रेष्ठिनो महाजना धनिकाश्च पुष्परथैः शकटैः शकटीभिश्च चलन्ति स्म । अनुचराः स्त्रीजनश्च प्रायः शिविकां गोरथं वारुह्य गच्छन्तोऽभूवन् । योद्धारः सैनिकाश्चाश्वारूढाः स्यन्दनस्थाश्चाभियान्ति स्म । द्विजेतरैः प्रायो वेसरारूढैर्यात्रा क्रियते स्म । सामान्यजनास्तु पद्भ्यामेव जग्मुः ।

साम्प्रतं तु नानाविधान्यद्भुतयानानि निर्मितानि सन्ति । तेषु प्रथमं रेलनाम्नीं गन्त्रीं पश्य । अस्या अग्रे "एंजिन" नामकं महद्यन्त्रं विद्यते, यस्यान्तर्लोहजाग्निः प्रज्वाल्यते । तदुपरि सुविशालसुदृढलोहपात्रे जलं प्रपूर्यते । तदग्नितापेन क्वथितजलात्प्रबलो वाष्पसमूहो वेगेनोत्तिष्ठति एव "एंजिन" यन्त्रं चालयति । तत्पृष्ठतः

खगा इवाकाशे विद्युद्बलेनोड्डीयन्ते । इमानि लघूनि बृहन्ति च भवन्ति। लघुष्वल्पसंख्या जना उपविश्योड्डीयन्ते । बृहत्सु तु बहवो जना निषद्योड्डयितुं शक्नुवन्ति गच्छन्ति च "रेलाद्" अप्यधिकवेगेनान्तरिक्षे । अद्यावध्येषामुपयोगो सैनिकविभाग एव दृश्यते ।

आसन् पुरा भारतवर्षेऽपि सुदृढा महान्तोऽतिशीघ्रगामिनो विमानाः । रामायणेऽपि वर्णितं महर्षिवाल्मीकिना यद्रावणं निपात्य श्रीरामचन्द्रस्सप्रियपरिजनः पुष्पकविमानमारुह्य लङ्कातोऽयोध्यामत्याजगाम ।

तेष्वारूढेषु सर्वेषु कौवेरं परमासनम् ।
राघवेणाभ्यनुज्ञातमुत्पपात विहायसम् ॥

टिप्पणी—अध्यापकश्छात्रान् कर्मधारयसमासं शिक्षयेत्तदुदाहरणानि च पाठादस्मादुद्धृत्य प्रदर्शयेत् ॥

खगा इवाकाशे विद्युद्बलेनोड्डीयन्ते । इमानि लघूनि वृहन्ति च भवन्ति। लघुष्वल्पसंख्या जना उपविश्योड्डीयन्ते । वृहत्सु तु वहवो जना निषद्योड्डयितुं शक्नुवन्ति गच्छन्ति च "रेलाद्" अप्यधिकवेगेनान्तरिक्षे । अद्यावध्येषामुपयोगो सैनिकविभाग एव दृश्यते ।

आसन् पुरा भारतवर्षेऽपि सुदृढा महान्तोऽतिशीघ्रगामिनो विमानाः । रामायणेऽपि वर्णितं महर्षिवाल्मीकिना यद्रावणं निपात्य श्रीरामचन्द्रस्सप्रियपरिजनः पुष्पकविमानमारुह्य लङ्कातोऽयोध्यामभ्याजगाम ।

तेष्वारूढेषु सर्वेषु कौवेरं परमासनम् ।
राघवेणाभ्यनुज्ञातमुत्पपात विहायसम् ॥

टिप्पनी—अध्यापकश्छात्रान् कर्मधारयसमासं शिक्षयेत्तदुदाहरणानि च पाठादस्मादुद्धृत्य प्रदर्शयेत् ॥

तृतीयः पाठः ।

जलयानानि ।

जलेऽपि स्थल इव कार्यवशान्मनुष्याः प्रायो गमागमं कुर्वन्ति । साधारणनदीषु कासारादौ च तरिं तरणिमुडुपं वारुह्य लोकास्तरन्ति पारञ्च गच्छन्ति । महानदीषु नदेषु च नावं व्यापाराय प्रयुञ्जते, तत्पारगमनाय च । द्वीपाद्द्वीपान्तरयात्रायान्तु पोतमारुह्य सागरपारं यान्ति, द्वीपान्तरेषु व्यापारं च कुर्वन्ति । पुरा भारतीया नानाविधभाण्डैः पोतान् प्रपूर्य चीनदेशं जावाद्वीपमन्यान्यपि द्वीपान्तराणि गत्वा महार्घाणि स्ववस्तूनि विक्रीणते स्म तत्रत्यानि समर्घाण्युपयोगिवस्तूनि भारतं च प्रत्यानयन्ति स्म । ते पोतवणिजः कथ्यन्ते । इदं भारतीयानां व्यापारस्य प्राचीना प्रथा ।

पुरा पोता अनुकूलवायुवशात् समुद्रे चलन्ति स्म । किन्तु साम्प्रतमसंख्या महान्तः सुदृढाः पोता निर्मिताः सन्ति । येषां चालनाय वायुर्नापेक्ष्यते । तन्मध्ये "रेलस्य" इव "इंजिन" यन्त्रं

इक्षुः ।

कृषाणा यथा गोधूमाद्यन्नानां कृषिं कुर्वते, तथैव तैरिक्षूणां कृषिरपि क्रियते। इक्षवो जात्या केचन तनुरूपाः केचन स्थूलाः केचन मृदवः केचन कठिनाश्च भवन्ति । इक्षुकाण्डः प्रलम्ब-दण्डाकृतिर्बहुपर्वा च भवति । प्रतिपर्वेक्षुनेत्रं भवति यदङ्कुराश्रयं जायते। माघे फाल्गुने वा मासि इक्षुकाण्डखण्डान् कृत्वा सम्यक् परिष्कृतक्षेत्रेषु तान् वपन्ति कृषि-ज्ञाना ग्रामीणाः । तदैव मासान्ते तन्नेत्रे-भ्योऽङ्कुराः प्ररोहन्ति । अवकरजलदानाद्युप-युक्तसेवया तेऽङ्कुरा विस्तारं गच्छन्ति, वर्धन्ते चोर्ध्वम्। चातुर्मास्ये पर्याप्तं मेघजलं लब्ध्वैव-मिक्षवो वर्धन्ते यत्क्षेत्रं तैः परिपूर्णं क्रियते। देवोत्थान्यां कार्तिकशुक्लैकादश्यां प्रथममिक्षु-काण्डान्त्रोटयित्वा स्वगृहमानयन्ति कृषकाः, पूजयन्ति च तैर्भगवन्तं नारायणम्। हिन्दुकृष-काणामियं रीतिः । इहत्ययवनकृषकाणा-मपीक्षुत्रोटनकालः स एवास्ति । मार्गशीर्षा-दारभ्य फाल्गुनीं यावदिक्षुकुट्टका रसगर्भानिक्षू-


न्निष्पीडयन्ति, कुर्वते च गुडं, मत्स्यण्डीं* फाणितं,† शर्करां, सितां‡ च।

इतो दृष्टिं देहि पश्य च कस्यचित्कृषकस्येक्षु-निष्पीडनं स्थानम् । यस्य वस्तुनः शिरसि किञ्चित्स्थूलः काष्ठदण्डो दृश्यते तदेव निष्पीडकयन्त्रमस्ति । इदं भुवि निखातमस्ति। एत-स्याग्रे चत्वारि छिद्राणि विद्यन्ते। तेष्वेव च्छि-द्रेष्विक्षुकाण्डान् प्रवेशयन्ती स्थितैका योषि-दृश्यते। तत्पृष्ठत इक्षुदण्डा दृश्यन्ते । युगस्क-न्धौ द्वौ वृषभौ यन्त्रशिरोदण्डे रश्मिना नियुक्तौ चालयन् कृषाण एको दृश्यते। वृषभौ यन्त्रस्य समन्ततो भ्राम्यतः, अत एकतो रसो निःसरति, अपरतश्चेक्षुकीकसानि । रसं नीत्वा कटाहे प्रक्षि-पन्ति प्रज्वालयन्ति च तदधस्तादग्निं कीक-सानि चेन्धनीकुर्वते। तेनैवेयं लघुभित्तिः कृष्णवर्णा सञ्जाता दृश्यते यन्मृत्तिकास्थालं तदुपरि दारुहस्तकश्च तेनैव घनीभूतं रसं कटाहान्निस्सार्य स्थाले प्रक्षिपन्ति, कुर्वन्ति च गुडं, स एव गुडो भाबुकद्वये भरितोऽव-लोक्यते। तोलयति चैको जनो ग्राहकश्च वस्त्रां-

* राब इति हिन्दीभाषायाम् ।

† कच्ची चीनी खांड वा इति हिन्दीभाषायाम् ।

‡ मिसरी ,, ,,



शरीरम्।

त्परा हनुः। हनुतो वयसि श्मश्रूणि जायन्ते। ग्रीवाम-
दधस्ताद्ग्रीवा, तस्यां घाटास्ति । ग्रीवाम-
भितः स्कन्धौ, तयोर्मूले भुजौ, भुजयोर्मध्यग्रन्थिः
कुर्परः॰ कफोणिर्वेत्युच्यते। तस्योपरि प्रगण्डः,
तस्याधश्च प्रकोष्ठः । प्रकोष्ठाधो मणिबन्धः ।
तदधः करः। द्वयोः करयोः पञ्चपञ्चाङ्गुल्यः। अङ्गु-
लीषु नखा भवन्ति । भुजयोर्मूले कक्षौ स्तः, तयो-
रधस्तात्पार्श्वौ, तयोर्भुजयोरन्तराले वक्षस्थलम्।
तस्य पश्चाद्भागः पृष्ठम्। अधश्चोदरम्। तदध-
स्तात्कटिः, तत ऊरू, ऊर्वोर्ग्रन्थी घुटिके कथ्येते।
ततो जानुनी, जानुचरणयोर्ग्रन्थी गुल्फौ। तयो-
रधः पार्ष्णी । अग्रतः प्रपदं तदग्रतः सनखा
अङ्गुल्योऽङ्गुष्ठश्च । समग्रः कायः सूक्ष्मया त्वचा
परिवेष्टितोऽस्ति । त्वचि स्पर्शेन्द्रियं तिष्ठति
येन स्पर्शस्य ज्ञानं भवति।

इदमेवास्माकं शरीरं सर्वेषां कार्याणां साधन-
मस्तीत्यलम्।

शरीरस्य गुणानां च दूरमत्यन्तमन्तरम्।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः॥

विद्यार्थिनः सनख-पदानि पाठदल्लाल्लनाहत्य पृथग् लिखेयुः समाल-
नाम च।

॰ कूर्परं कुल्पि स्पन्भवति।

पर्व्वताः ।

पर्वता मृत्तिकाम्प्रस्तरञ्च मेलयित्वा लोकोपकाराय विधात्रा निर्मिताः । ते भूभृतः, शिखरिणः, अद्रयः, गिरयः, अचलाः, शैलाः, इत्यादिनामभिः कथ्यन्ते ।

गिरिभ्यो ये जलप्रवाहा निस्सरन्ति निर्झरा झरा वोच्यन्ते । नद्योपि प्राय एभ्य एवोद्भवन्ति । पर्वतेषु हिमालयः सर्वेषूच्चतमः, अतएव स भूभृतां राजा कथ्यते । अयमद्रिः भारतवर्षस्योदीच्यां दिशि वर्तते, अस्य शिखराणि हिमेनाच्छादितानि तिष्ठन्ति, इति हेतोरमुष्य नाम हिमालयो हिमवान्वेति लोके प्रसिद्धम् । गङ्गाभागीरथ्यस्मादेव गिरिराजान्निर्गता, तन्निर्गमस्थानं सम्प्रति गङ्गोत्तरीनाम्ना विख्यातम् । विन्ध्याचलोऽपि महान् पर्वतः । अयम्पूर्वापरजलनिध्योर्वेलापर्य्यन्तं विस्तीर्णोऽस्ति । शैलोऽयम्मध्यप्रदेशालङ्कारभूतः सन् भारतवर्षस्य मेखलेव तिष्ठति । एतस्यैव समीपेऽमरकंटकान्नर्मदा निस्स-

सप्तमः पाठः।

कालिदासः।

महाकविरयं कालिदासः कविषु श्रेष्ठ इति निर्विवादम्। अस्य काव्ये प्रसादमाधुर्यादयो गुणाः ये सत्काव्येऽपेक्षिता भवन्ति विद्यन्ते, अतएवास्य महाकवेस्तत्काव्यानां च सभ्यसमाज आदरातिशयोऽस्ति।

महाकविरसौ कदासीदिति संदिग्धम्, यदीशवीयेऽष्टमे शतकेऽयमभवदित्येके, द्वादशे शतके तस्य सत्तेत्यपरे। केचित्त्वेनं विक्रमसभानवरत्नैकरत्नं कथयित्वा ईशातः सप्तपञ्चाशद्वर्षपूर्वकालिकं समर्थयन्ते।

कवीन्द्रोऽसौ ब्राह्मण आसीदिति तु सर्वसम्मतम्। किन्तु कुत्रत्यो ब्राह्मण इत्यपि विवादग्रस्तम्, यतः केचिदेनं काश्मीरदेशीयमनुमन्यन्ते, इतरे पञ्चाम्बुदेशनिवासिनमेनञ्जानन्ति, तथापरे मालवीयमेतं वदन्ति।

अथास्य महाकवेर्विषये वृद्धपरम्परागता या जनश्रुतिः श्रूयते, सा त्वेवं यदयं रूपयौवन-

शीयत्रोटकं, चतुर्थं श्रुतबोधं, पञ्चममृतुसंहारं, षष्ठं नलोदयं, सप्तमं शृङ्गारतिलकं, अष्टमं ज्योतिर्विदाभरणमिति । ततो राक्षसकाव्यादयोऽन्येऽपि ग्रन्था अनेन रचिताः,—इत्येष महाकविर्लोके प्रख्यातिं जगाम । ततश्चिरमैहिकं सुखं भुक्त्वा यशःशरीरेणाद्यापि जीवंस्तिष्ठति ।

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥

टिप्पनी—विद्यार्थिनः पाठादस्मादुद्धृत्य भूतकालरूपाणि तत्तत्काल नाम च लिखित्वाध्यापकाय दर्शयेयुः पठित्वा श्रावयेयुश्च ॥

अध्यापको विद्यार्थिनामदधानं पूरणीसंख्याया उपरि कारयेत् । एवंविधान् प्रश्नांश्च पृच्छेत् । यत्,

छात्राः ! १ अद्य मासस्य कतिथन्दिनम् ?

२ अद्य सप्ताहस्य कतिथो वारः ?

३ पूर्णिमा मासस्य कतिथी तिथिर्भवति ? इत्यादि ॥

४ यदा यदाध्यापकोऽवकाशं लभेत, तदा तदा पृष्टानां पाठानाञ्च संख्यामादाय छात्रद्वारा पूरणीं संख्यां कारयेत् ॥

———

अष्टमः पाठः ।

बुद्धदेवः ।

प्रायेण सार्द्धद्विसहस्रं वर्षाणि व्यतीयुर्यद्बभूव कपिलवस्तु नाम नगरी राजधानी, या किल वाराणस्या उदीच्यां दिशि सप्तदशयोजन आसीत्। तत्र गौतमनाम्नि गोत्रे शाक्यवंश्याः क्षत्रिया राजानो बभूवुः। तेषु शुद्धोदनो नाम राजा विविदे, तस्य धर्मपत्नी मायादेवी पुत्रं सुषुवे, पिता तस्य सिद्धार्थ इति-नाम चकार, यतः सिद्धाः सर्वेऽर्था येन जातेनेति।

तज्जन्मनः सप्तमेऽहनि तस्याम्बा ममार, तन्मातृष्वसा तस्य पालनं पोषणञ्च चक्रे। यदायं ववृधे स्वगोत्रनाम्ना गौतम इति प्रसिद्धिं जगाम। एष सुबुद्धिमान् गुणी शूरो वीर्य्यवांश्च प्रतीतः, यतस्सङ्ग्रामे तदानींतनाञ्जित्वरशूरान् सर्वानयं जिगाय। ततो भूनि सञ्जातेऽस्मिन् यशोधरा नाम कापि राजकन्या सौन्दर्यादिगुणसम्पन्ना तं पतिं वव्रे। विवाहाद्दशमे वर्षे सा सुतनेकं

ब्राह्मणानामन्तिके पठितुमारेभे पपाठ च षडपि शास्त्राणि तथापि शान्तिन्न प्राप । तदानीन्तद्वनं गत्वा यत्र सम्प्रति बोधगया वर्त्तते तीव्रं तप-स्तेपे, तपस्यतस्तस्य शरीरमतीव क्षीणं जातम् । किन्तु स तत्रापि शान्तिं न लेभे । तदा विचार-यितुमारब्धवान् यज्जननमरणदुःखाद्विनिर्मुक्तये को नामोपायः करणीय इति । एवं चिरं ध्यायत-स्तस्य मनसि सहसेदमाविर्बभूव यन्निजेन्द्रिय-निग्रहेण सर्वभूतेषु दयाकरणेनैव च मनुष्य इह सुखमपरञ्च चामृतं यन्निर्वाणमिति कथ्यते लब्धुं शक्नोति । मनस्येतत्सिद्धान्तोदयस्य समकाल-मेवायमानन्दविकसिताक्षो देदीप्यमानमुखकमल-श्च बभौ । तत एव कालादयम्बुद्धः कथ्यते । तदा सिद्धान्तस्यास्य प्रचारो लोके कर्तव्य इति निश्चित्य प्रथममागत्य च काशीं लोकानुपदिदेश अनन्तरमिमं सिद्धान्तम्पृथिव्यामेवं प्रचारया मास यथा यत्र तत्र लोकास्तस्यानुयायिनो भवि लग्नाः, ते बुद्धस्येम इति बौद्धाः कथ्यन्ते स चतुश्चत्त्वारिंशद्वर्षाणि यावद् "आत्मनिग्र



नवमः पाठः ।

कुटुम्बम् ।

पिता माता पुत्रा दुहितरश्चैकं कुटुम्बं उच्यते। पिता माता च पितरौ जनकौ वा स्तः, तयोः सुताः पुत्राः पुत्र्यश्चान्योऽन्यस्य भ्रातरो भगिन्यश्च सन्ति, तेषु कश्चिज्ज्येष्ठः कोऽपि कनिष्ठः काचिदग्रजा काप्यनुजा भवति।

पित्रोराज्ञापालनं प्रसादनञ्च सन्तानस्य कर्त्तव्यमस्ति यथा पितरौ सुखिनौ स्यातान्तथा कार्यञ्च। भ्रातरो भगिन्यश्च परस्परम्प्रीतिं रक्षेयुः, कृपालवश्चान्योन्यस्मिन् भवेयुः।

पितुः पितरौ पितामहः पितामही च कथ्येते, तथा मातुः पिता मातामहो मातुर्माता मातामही, एवं प्रपितामहः प्रपितामही प्रमातामहः प्रमातामहीत्यादि।

पितुर्भ्राता पितृव्यः, मातुर्भ्राता मातुलो मामश्च* भवति। तत्पत्नी मातुलानी मामी च कथ्यते। पितुर्भगिनी पितृष्वसा तत्पुत्रः पैतृष्वसेयः। मातुर्भगिनी मातृष्वसेति तत्पुत्रो

* इदं पदं लोकभाषायामेव प्रयुज्यते ।

दशमः पाठः ।

ढपोरशङ्खः । (१) ।

बभूव दक्षिणापथे कश्चिन्निर्धनो ब्राह्मणः, निर्धनत्वेन समं जगति किमपि दुःखन्नास्त्यन्यदिति मनसि कृत्वा वरुणाराधनाय स ब्राह्मणो वरुणालयं समुद्रं गतवान्, तत्र गत्वाञ्जलिना समुद्रजलमुदञ्चन् 'ओं वरुणाय नमः, ओं वरुणाय नमः, ओं वरुणाय नमः' इत्यजपत्। इति कुर्वतस्तस्य द्वित्राणि दिनानि व्यतीतानि। स तथैव निरन्तरं करोति दिवानक्तं न विचारयति, क्षणमपि नो विश्राम्यति।

तदा वरुणो वृद्धब्राह्मणवेषं धृत्वा तत्रागत्य ब्राह्मणं पृष्टवान्, "ब्राह्मण! किमिदं क्रियते?" ब्राह्मणोऽपि सभ्रूभङ्गं हूँ शब्देन तमवज्ञाय, तदेव कुर्वन्नतिष्ठत्, पुनरपि वरुणोऽवदत् यद् ब्राह्मण! को भवान्? कुतस्समायातः? किमर्थं किमिदं च कुरुषे? इति श्रुत्वा स ब्राह्मणः सक्रोधमब्रूते, 'रे! योऽस्मि सोऽस्मि कुतोऽप्यागतोऽस्मि, कञ्चिदर्थं वा किमपि करोमि त्वं कुत :
मारब्धे कर्मणि अन्तरायोऽभूः'।

वहन्नेकस्मिन् प्रदोषे नगरमेकमाससाद । तत्र कस्यचिद्वणिजो गृहेऽतिथिरभवत् । अकथयच्चामूलात्सर्वं पद्मशङ्खीवृत्तम् । अदर्शयच्च तत्प्रार्थितः शङ्खीतस्तत्क्षणमादाय सुवर्णं तस्मै वणिजे सपरिवाराय । इति दृष्ट्वा विस्मितः स वणिक्तां ग्रहीतुं मतिमकरोत् । अब्रवीच्च ब्राह्मणं, विप्र ! एहि भुङ्क्ष्व । इत्युक्त्वा तमन्तर्गृहं नीत्वा स्वादून्यन्नानि भोजयामास । अग्रहीच्च स्वैरं निधि तां शङ्खीम् । ब्राह्मणस्तूषसि निजपोट्टलिकामादाय गतोऽभूत् । वणिक् च प्रतिदिनं शङ्खीतस्सुवर्णमेवं ग्रहीतुं प्रवृत्तः ।

ययौ। तं दृष्ट्वैवाभूदतीव सुमनाः सकुटुम्बो वणिक्। तमखादयच्च पूर्ववद्बहुगुणमन्नं सुस्वादु पक्वसम्।

ततो भुक्त्वा सुखासीनो द्विजः कथयति। भद्र! सा मे पद्मशङ्खी क्वापि विनष्टा। अस्मिन्वार इमं ढपोरशङ्खमानीतवानस्मि। अयं प्रार्थिताद्बहुगुणमधिकं ददाति। अथ ब्राह्मणस्तं शङ्खं ब्रूते। भो महाशङ्ख! देहि मे शतं मुद्राः। ततो 'भम्भम्भ' इति शब्दपूर्वकं शङ्खो ब्रूते। 'शतं गृहाण, सहस्रं गृहाण, अयुतं गृहाण, लक्षं गृहाण, नियुतं गृहाण, कोटिं गृहाण।' तदा ब्राह्मणेनोक्तं, महाशङ्ख! नास्त्यत्र प्रयोजनं धनस्य, गृहमासाद्य दास्यसि। इत्युक्त्वा सुष्वाप। वणिगपि रात्रौ तस्य पोट्टलिकायां पद्मशङ्खीं बबन्ध, जहार च तं महाशङ्खम्। व्याजप्रसुप्तेन ब्राह्मणेनापि ज्ञातम्। यदागता सा मे पद्मशङ्खीत्युत्थाय प्रचलितः।

प्रातर्वणिक् तं महाशङ्खं सम्पूज्य याचते। महाशङ्ख! देहि मे सहस्रं दीनारान्। स पुनः पूर्ववत्, अयुतं, लक्षं, नियुतमित्यादि कथयितुमारब्धः।

द्धिस्तेनैव सह गुरुजनानुज्ञातश्शुभेऽहनि देशान्तरं प्रस्थितः। तत्र च धर्म्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तमासादितम्। ततश्च द्वावपि तावुपार्जितप्रभूतद्रव्यौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन निवृत्तौ।

अथ स्वस्थानसमीपवर्त्तिना पापबुद्धिना धर्म-बुद्धिरभिहितः, भद्र! न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते, यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ते। तदत्रैव वनगहने क्वापि भूमौ निक्षिप्य किञ्चिन्मात्रमादाय गृहं प्रविशावो भूयोऽपि प्रयोजने सञ्जाते तन्मात्रं समेत्यास्मात् स्थानात् नेष्यावः। उक्तञ्च—

न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो।
मुनेरपि यतस्तस्य दर्शनाच्चलते मनः॥

तथा च—

यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान्॥

तदाकर्ण्य धर्मबुद्धिः प्राह,—"भद्र! एवं क्रियताम्।" तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा

विवादेऽन्विष्यते पत्रं तदभावेऽपि साक्षिणः ।
साक्ष्यभावात्ततो दिव्यं प्रवदन्ति मनीषिणः ॥

तदत्र विषये मम वृक्षदेवताः साक्षिभूतास्तिष्ठन्ति । ता अप्यावयोरेकतरं चौरं साधुं वा करिष्यन्ति । अथ तैः सर्वैरभिहितम्—"भोः! युक्तमुक्तं भवता । तदस्माकमप्यत्र विषये महत्कौतूहलं वर्त्तते । प्रत्यूषसमये युवाभ्यामप्यस्माभिः सह तत्र वनोद्देशे गन्तव्यम्" इति । एतस्मिन्नन्तरे पापबुद्धिः स्वगृहं गत्वा स्वजनकमुवाच—"तात ! प्रभूतोऽयं मयार्थो धर्म्मबुद्धेश्चोरितः, स च तव वचनेन परिणतिं गच्छति, अन्यथास्माकं प्राणैः सह यास्यति ।" स आह—"वत्स ! द्रुतं वद येन तद्द्रव्यं स्थिरतां नयामि ।" पापबुद्धिराह- "तात ! अस्ति तत्प्रदेशे महाशमी, तस्यां महत्कोटरमस्ति, तत्र त्वं साम्प्रतमेव प्रविश । ततः प्रभाते यदाहं सत्यश्रावणं करोमि, तदा त्वया वाच्यं यद्धर्मबुद्धिश्चौरः" इति । तथानुष्ठिते प्रत्यूषे स्नात्वा पापबुद्धिः धर्म्मबुद्धिपुरःसरो धर्माधिकरणिकैः सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच—

"भगवति वनदेवते ! आवयोर्मध्ये यश्चौरस्तं कथय"। अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच—"भोः ! शृणुत, शृणुत, धर्म्मबुद्धिना हृतमेतद्धनम्"। तदाकर्ण्य सर्वे ते राजपुरुषा विस्मयोत्फुल्ललोचना यावद्धर्म्मबुद्धेर्वित्तहरणोचितं निग्रहं शास्त्रदृष्ट्यावलोकयन्ति, तावद्धर्म्मबुद्धिना तच्छमीकोटरं वह्निभोज्यद्रव्यैः परिवेष्ट्य वह्निना सन्दीपितम्। अथ ज्वलति तस्मिन् शमीकोटरेऽर्धदग्धशरीरः स्फुटितेक्षणः करुणं परिदेवयन् पापबुद्धिपिता निश्चक्राम। ततश्च तैः सर्वैः पृष्टः—"भोः ! किमिदम्" ?। इत्युक्ते स पापबुद्धिविचेष्टितं सर्वमिदं निवेद्य उपरतः। अथ ते राजपुरुषाः पापबुद्धिं शमीशाखायां प्रतिलम्ब्य धर्मबुद्धिं प्रशंसितवन्तः॥

विहृत्यात्र नित्यमेव नैको मृगः समागमिष्यति, तन्नूनं सर्वानपि भक्षयिष्यामि । अथ ते तथैव प्रतिज्ञाय निर्वृतिभाजः तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं वारक्रमेण याति । वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्य भोजनार्थं मध्याह्नसमय उपतिष्ठते । अथ कदाचिज्जातिक्रमाच्छशकस्य वारः समायातः । स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता तेन कूपः संदृष्टः । यावत् कूपोपरि याति, तावत् कूपमध्य आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वा च तेन हृदये चिन्तितम्, यद्भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्ध्यास्मिन् कूपे पातयिष्यामि । अथासौ दिनशेषे भासुरकसमीपे प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्कणी परिलेलिहानः व्यचिन्तयत् । अहो प्रातराहाय निःसत्त्वं वनं मया कर्त्तव्यम् । एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य

विष्टस्यात्र नित्यमेव नैको मृगः समागमिष्यति, तन्नूनं सर्वानपि भक्षयिष्यामि । अथ ते तथैव प्रतिज्ञाय निर्वृतिभाजः तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं वारक्रमेण याति । वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्य भोजनार्थं मध्याह्नसमय उपतिष्ठते । अथ कदाचिज्जातिक्रमाच्छशकस्य वासरः समायातः । स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता तेन कूपः संदृष्टः । यावत् कूपोपरि याति, तावत् कूपमध्य आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वा च तेन हृदये चिन्तितम्, यद्भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्ध्यास्मिन् कूपे पातयिष्यामि । अथासौ दिनशेषे भासुरकसमीपे प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्कणी परिलेलिहानः व्यचिन्तयत् । अहो प्रातराहाराय निस्सत्त्वं वनं मया कर्त्तव्यम् । एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य

विष्टस्यात्र नित्यमेव नैको मृगः समागमिष्यति, तन्नूनं सर्वानपि भक्षयिष्यामि । अथ ते तत्रैव प्रतिज्ञाय निर्वृतिभाजः तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं वारक्रमेण याति । वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्य भोजनार्थं मध्याह्नसमय उपतिष्ठते । अथ कदाचिज्जातिक्रमाच्छशकस्य वासरः समायातः । स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता तेन कूपः संदृष्टः । यावत् कूपोपरि याति, तावत् कूपमध्य आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वा च तेन हृदये चिन्तितम्, यद्भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्ध्यास्मिन् कूपे पातयिष्यामि । अथासौ दिनशेषे भासुरकसमीपे प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्कणी परिलेलिहानः व्यचिन्तयत् । अहो प्रातराशाय निस्सत्त्वं वनं मया कर्त्तव्यम् । एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य

विद्दस्यात्र नित्यमेव नैको मृगः समागमिष्यति, तन्नूनं सर्वानपि भक्षयिष्यामि । अथ ते तथैव प्रतिज्ञाय निर्वृतिभाजः तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं वारक्रमेण याति । वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्य भोजनार्थं मध्याह्नसमय उपतिष्ठते । अथ कदाचिज्जातिक्रमाच्छशकस्य वारः समायातः । स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता तेन कूपः संदृष्टः । यावत् कूपोपरि याति, तावत् कूपमध्य आत्मनः प्रतिविम्बं ददर्श । दृष्ट्वा च तेन हृदये चिन्तितम्, यद्भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्ध्यास्मिन् कूपे पातयिष्यामि । अथासौ दिनशेषे भासुरकसमीपे प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्कणी परिलेलिहानः व्यचिन्तयत् । अहो प्रातराहाय निःसत्त्वं वनं मया कर्त्तव्यम् । एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य

विहृस्यात्र नित्यमेव नैको मृगः समागमिष्यति, तन्नूनं सर्वानपि भक्षयिष्यामि । अथ ते तथैव प्रतिज्ञाय निर्वृतिभाजः तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं वारक्रमेण याति । वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्य भोजनार्थं मध्याह्नसमय उपतिष्ठते । अथ कदाचिज्जातिक्रमाच्छशकस्य वासरः समायातः । स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता तेन कूपः संदृष्टः । यावत् कूपोपरि याति, तावत् कूपमध्य आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वा च तेन हृदये चिन्तितम्, यद्भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्ध्यास्मिन् कूपे पातयिष्यामि । अथासौ दिनशेषे भासुरकसमीपे प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्कणी परिलेलिहानः व्यचिन्तयत् । अहो प्रातराशाय निस्सत्त्वं वनं मया कर्त्तव्यम् । एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य

मागच्छ। येन यः कश्चिदावयोर्मध्यात्पराक्र-
मेण राजा भविष्यति स सर्वानेतान्भक्षयिष्यतीति।
ततोऽहं तेनादिष्टः स्वामिसकाशमभ्यागतः। एत-
द्वेलातिक्रमकारणं तदत्र स्वामी प्रमाणम्।
तच्छ्रुत्वा भासुरक आह, भद्र! यद्येवं तर्हि
सत्वरं दर्शय मे तं चौरसिंहं येनाहं मृगकोपं
तस्योपरि क्षिप्त्वा स्वस्थो भवामि। शशक
आह। अस्त्येतत्तथापि बलवान् स मया दृष्ट-
स्तन्न युज्यते स्वामिनस्तस्य सामर्थ्यमविदित्वा
गन्तुं।

भासुरक आह। भोः किं तवानेन व्यापारेण
दर्शय मे तं दुर्गस्थमपि। अथ शशक आह। यद्येवं
तर्ह्यागच्छतु स्वामी एवमुक्त्वाग्रे व्यवस्थितः।
ततश्च तेनागच्छता यः कूपो दृष्टोऽभूत् तमेव कूप-
मासाद्य भासुरकमाह। स्वामिन्! कस्ते प्रतापं
सोढुं समर्थः, त्वां दृष्ट्वा दूरतोऽपि चौरसिंहः
प्रविष्टः स्वदुर्गं, तदागच्छ येन दर्शयामि। भासुरक
आह। दर्शय मे दुर्गं, तदनु दर्शितस्तेन कूपः। तत-
स्सोऽपि मूर्खः सिंहः कूपमध्य आत्मप्रतिबिम्बं

गम्यताम्, जलकल्लोलैः प्लाव्यते मे शरीरम्।
तदाकर्ण्य मकरश्चिन्तयामास, असावगाधं जलं
प्राप्तो मे वशः संजातः। मत्पृष्ठगतः तिलमात्रमपि
चलितुं न शक्नोति। तस्मात्कथयाम्यस्य निजा-
भिप्रायम्। येनाभीष्टदेवतास्मरणं करोतु। आह
च, मित्र! त्वं मया वधाय समानीतो भार्या-
वाक्येन विश्वास्य, तत्स्मर्यतामभीष्टदेवता। स
आह, भ्रातः! किं मया तस्यास्तवापि चाप-
कृतं? येन मे वधोपायश्चिन्तितः। मकर आह।
भोः तस्यास्तावत्तव हृदयस्यामृतमयफलरसास्वा-
दनमृष्टस्य भक्षणे दोहदः संजातः। तेनैतदनुष्ठितम्।
प्रत्युत्पन्नमतिर्वानर आह, यद्येवं तत्किं त्वया
मम तत्रैव न व्याहृतम्। येन स्वहृदयं जम्बु-
कोटरे सदैव मया सुगुप्तं कृतं, तद्भ्रातृपत्न्या
अर्पयामि, त्वयाहं शून्यहृदयोऽत्र कस्मादानीतः?
तदाकर्ण्य मकरः सानन्दमाह। भद्र! यद्येवं तद-
र्पय मे हृदयं येन सा कुभार्या तद्भक्षयित्वाऽनश-
नादुत्तिष्ठति। त्वामहं तमेव जम्बूपादपं प्राप-
यामि। एवमुक्त्वा निवर्त्य जम्बूतलमगात्

वानरोऽपि कथमपि जीवितो विविधदेवतोपहार-इष्टस्तोत्रनानादिकृतवान्। ततश्च दीर्घतरचङ्क्रमणेन तेनैव जम्बूपादपमारुह्य चिन्तयामास। अहो ! लब्धास्तावत् प्राणाः। तन्ममैतदद्य पुनर्जन्म-दिनमिव संजातम्। इति चिन्तयन्तं मकर आह।

भो मित्र ! अर्पय तद्धृदयं यथा ते भ्रातृ-पत्नी भक्षयित्वानशनादुत्तिष्ठति। अथ विहस्य निर्भर्त्सयन् वानरस्तमाह। धिग्धिङ्मूर्ख ! वि-श्वासघातक ! किं कस्यचिद्धृदयद्वयं भवति। तदाशु गम्यतां जम्बूवृक्षस्याधस्तान्न भूयोऽपि त्वयानागन्तव्यम्।

समुत्पन्नेषु कार्य्येषु बुद्धिर्यस्य न हीयते।
स एव दुर्गं तरति जलस्थो वानरो यथा॥

अतिथिरुवाच ।

अहो ब्राह्मणदायाद चारित्रं किमिदं तव ।
अभ्यागतं ते तिष्ठन्तं प्राङ्गने मां न पश्यसि ।
धर्मः किं ते गृहे नास्ति अतिथिर्येन सेव्यते ॥२४॥
अतिथिर्यस्य भवनान्निराशो याति सर्वथा ।
सर्वपुण्यपरित्यक्तो भवेत् पापानि च क्षणात् ॥२५॥
अतिथिर्धर्मरूपो हि गृहस्थानां गृहे गृहे ।
जिघ्रांसमानो गार्हस्थ्यधर्मांस्तु निरपेक्षकः ।
चरते नन्विदं नैव श्रुतं ते गृहिपुत्रक ॥२६॥
चाण्डालं ब्राह्मणं वापि यो नार्चयति चातिथिम् ।
आत्मसम्भावनो मूर्खः प्रत्युपकारचिन्तकः ।
न मुखं तस्य पश्यन्ति नरके पतिता अपि ॥२७॥
त्वं तु मे वचनेनापि नातिथ्यं विहितं कियत् ।*
यामि त्वामनभिप्रष्यैव पश्य मे ब्राह्मणं बलम् ॥२८॥

ब्राह्मण उवाच ।

अतिथे किं मयि भवान् क्षिपति क्रोधदर्शनम् ।
अतिथिर्धर्मरूपो वै यस्त्वं चरसि भूतले ॥२९॥

---

*[illegible]
त्वनातिथ्यं विहितवानद्यातिथ्यस्य
विहितमिति भवितव्यम्

क्लेशयित्वा मया देहं यन्न ज्ञानमुपार्जितम् ।
तत्त्वमेतेन वयसा कुतः समुदपादयः ॥३८॥
केन त्वत्सदृशं ज्ञानं प्राप्नुयां तन्निदिश्यताम् ।
त्वं मे गुरुरभूः स्वल्पवया अपि मतिप्रदः ॥४०॥

पराशर उवाच ।

एवमुक्तः सोऽतिथिना त्यक्तमत्सरचेतसा ।
तत्र विस्मययुक्तेन द्विजस्तं द्विजमब्रवीत् ॥४१॥

ब्राह्मण उवाच ।

याहि वाराणसीं विप्र तत्र कश्चिद् वसत्युत ।
व्याधः साधुर्धर्मशीलस्तुलाधार इति श्रुतः ॥४२॥
स ते निःसंशयं सर्वं कथयिष्यति धार्मिकः ।
दृष्ट्वैव चरितं तस्य तव ज्ञानं भविष्यति ॥४३॥
पुरा जावालिनाम्ने स ददौ ज्ञानं द्विजातये ।
तन्निदर्शनजं धर्मं कियदेतत् चराम्यहम् ॥४४॥
इह क्षणं चोपविश पिता मे प्रतिबुध्यतु ।
एतेन पूजितस्तत्र यास्यसि ज्ञानवृद्धये ॥४५॥

पराशर उवाच ।

इत्युक्तः सोऽतिथिर्व्यास परमं विस्मयं गतः ।
तूष्णीं स्थितः किञ्चिदपि नोवाच साध्वसाधु वा ।

व्याध उवाच ।

स्वागतं ते द्विजसुत प्रेषितोऽसि द्विजातिना ।
मत्सन्निधानं मात्सर्यं तेन निःसारितं तव ।
यत्त्वयोपार्जितं पक्षिनीडीकृतशिरेण वै ॥ ५५ ॥
वेत्स्यामि तव सन्देहं ब्रह्मन् यस्ते हृदि स्थितः ।
गृहान् मम समागच्छ त्वं सायमतिथिः किल ॥५६॥

पराशर उवाच ।

इत्युक्तः स द्विजस्तेन व्याधेन चरितात्मना ।
परमं विस्मयं प्राप्तो न वक्तुमशकद् यतः ॥ ५७ ॥
सह तेन गतस्तस्य भवनं साधुधर्मिणः ।
ददर्श भवनं चारु नानाशोभाविराजितम् ॥ ५८ ॥
तत्र व्याधस्तुलाधारः प्रणम्य पितरौ गृहे ।
भार्यया सहधर्मिण्या पश्यतश्च द्विजन्मनः ।
तस्थौ तयोस्तु पुरतः पित्रोर्व्याधः सुभक्तिमान् ॥५९॥
तथाभूतं स्थितं तञ्च व्याधं धर्मवतां वरम् ।
पिता प्रोवाच मुदितः सेव्यतामतिथिः सुत ॥ ६० ॥
इत्याज्ञप्तः पितृभ्यां स यथाविधि यथाधनम् ।
ब्राह्मणं पूजयामास यथायोग्यं यथामति ॥ ६१ ॥
विश्रान्ते सुखमासीने ब्राह्मणे व्याध एव सः ।
संपूजयित्वा* पितरौ यथाकालक्रियोचितम् ॥ ६२ ॥

---

* आर्षोऽयम्प्रयोगः ।

पूर्वपोषमनुस्मृत्य पित्रे वारि ददौ कियत् ।
सम्भ्रमात् तत्र जाले च पपात च ममार च ॥७०॥
स पक्षितनयः पक्षिवपुर्हित्वा च तत्क्षणात् ।
धृत्वा दिव्यं वपुः सर्वैः स्तूयमानं ययौ दिवम् ॥७१॥
तद् दृष्ट्वाश्चर्यमतुलं विस्मयाविष्टमानसम् ।
मामुवाच स वै विप्रः पृष्टश्च ज्ञानिनां वरः ॥७२॥
व्याधपुत्र शकुन्तोऽसौ त्वया बद्धस्य पक्षिणः ।
औरसस्तनयः पूर्वं स्मृत्वा पित्रे ददौ जलम् ॥७३॥
अविचिन्त्यैव मरणं पितरं तमपूजयत् ।
एतेन कर्मणा तस्य गतिरेषाभिपद्यते ॥७४॥
बाल त्वमपि पितरौ सेवस्व देशितो मया ।
दिव्यं ज्ञानं वपुश्चापि भविष्यति तव ध्रुवम् ॥७५॥
इत्येवमुक्तस्तेनाहं गुरुणा ब्राह्मणेन हि ।
प्रतिज्ञाय सदा पूजां पित्रोरेतां चराम्यहम् ॥७६॥
नाहं जाने तपोदान-व्रतयज्ञादिकं च यत् ।
पित्रोश्चरणयोः सेवामेवैकां जान एव हि ।
यन्मे ज्ञानं समुत्पन्नं पित्रोः सेवाफलं च तत् ॥७७॥
प्रातरुत्थाय तं विप्रं पितृसेवोपदेशकम् ।

प्रणम्य पितृसेवाञ्च करोमि तदनन्तरम् ।
क्रीत्वा मांसानि विक्रीय वैश्यवृत्तिर्गृहं चरे ॥७८॥
भार्यापि लब्धा सुभगा मदेकपतिदेवता ।
तया सह चरे धर्मं पितृसेवां तथातिथे ॥७९॥
त्वं तु पित्राननुमतो देहकर्षणमुग्रकम् ।
अन्यत्रालब्धशरणः सिन्धुतीरेऽचरस्तपः ।
यत्र वै मूषिकाद्याद्या वरं विश्वासमागताः ॥८०॥
त्वामदृष्ट्वा तव पिता बहुनुतप्तवांस्तथा ।
तेन ते विहितं चोग्रं तपोऽस्थिरमभून्ननु ॥८१॥
श्वेतं तद्बकरूपेण तपस्ते खमुपाश्रितम् ।
तव पित्रनुतापाग्नेर्भस्म दृष्टं त्वया क्षणात् ॥८२॥
निःसृते तपसि ह्युग्रे साहङ्कारोऽभवद् भवान् ।
अत एवाधुना विप्र मद्वाक्यमवधाय हि ॥८३॥
गृहान् गत्वा प्रयत्नेन पितरौ यज सर्वथा ।
एवं तवोदितं सर्वं लप्स्यसे ह्यभिवञ्छितम् ॥८४॥

पराशर उवाच ।

इत्युक्तः स द्विजसुतः प्रसन्नात्मा तुलाधृता ।
पितरौ केन तुष्येतामिति प्रातर्गृहं ययौ ॥८५॥

पत्रव्यवहार-पद्धतिः ।

हरिद्वारात्

माघपूर्णिमायाम्

श्रीपूज्यपादाः प्रणामपुरस्सरं विज्ञाप्यन्ते यत्प्राप्तम्मया भवत्प्रेषितम्पत्रन्द्रव्यञ्च । भवत्कृपयात्र कुशलं वर्त्तते । अस्मिन्वर्षे श्रीर्णवस्त्राणाम्मूल्यं द्विगुणं त्रिगुणं च जातमतोऽपर्याप्ताः पञ्चदश रूप्यकाः, एतत्संख्यका मुद्राः पुनः प्रेषयन्तु भवन्त इति प्रार्थये ॥

पितृचरणसेवकः

चन्द्रधरशर्म्मा

काशीतः

चैत्रशुक्लपञ्चम्याम्

श्रीमन्मातृचरणकमलेषु मदीयास्साष्टाङ्गप्रणामाः सन्तु । गृहागमनाय भवत्याज्ञप्तोऽस्मि । एतद्विषये निवेदनमस्ति यदागामिनि मासे वार्षिकी परीक्षास्माकम्भविष्यति, तदनन्तरं द्विमासपर्य्यन्तमवकाशः । अवकाशसमय एवागमिष्यामि, अन्यथा परीक्षार्थः प्रयासो वैफल्यम् प्राप्स्यति ॥

भवद्वात्सल्यास्पदम्

गङ्गाधरशर्म्मा

प्रयागात्

माघशुक्लचतुर्दश्याम्

त्पूज्या गुरुवराः सविनयं निवेद्यन्ते, यन्मम गेहेऽद्य शिष्ट-

पुंलिङ्गशब्दरूपाणि ।

दातृ—देनेवाला ।

	ए० व०	द्वि० व०	ब० व०
	दाता	दातारौ	दातारः
०	दातारम्	,,	दातॄन्
	दात्रा	दातृभ्याम्	दातृभिः
०	दात्रे	,,	दातृभ्यः
०	दातुः	,,	,,
०	,,	दात्रोः	दातॄणाम्
०	दातरि	,,	दातृषु
सम्बो०	हे दातः	हे दातारौ	हे दातारः

ग्लौ—चन्द्रमा ।

	ए० व०	द्वि० व०	ब० व०
प्र०	ग्लौः	ग्लावौ	ग्लावः
द्वि०	ग्लावम्	,,	,,
तृ०	ग्लावा	ग्लौभ्याम्	ग्लौभिः
च०	ग्लावे	,,	ग्लौभ्यः
पं०	ग्लावः	,,	,,
ष०	,,	ग्लावोः	ग्लावाम्
स०	ग्लावि	,,	ग्लौषु
सम्बो०	हे ग्लौः	,,	हे ग्लावः

[illegible] ।

[illegible] ।

	ए० व०	द्वि० व०	ब० व०
प्र०	[illegible]	[illegible]	[illegible]
द्वि०	[illegible]	[illegible]	[illegible]
तृ०	[illegible]	„	[illegible]
च०	[illegible]	[illegible]	[illegible]
प०	[illegible]	„	„
ष०	[illegible]	„	[illegible]
स०	„	[illegible]	[illegible]
सं०	[illegible]	„	हे [illegible]
सम्बो०	हे रातः	हे [illegible]	

ग्लौ—[illegible] ।

	ए० व०	द्वि० व०	ब० व०
प्र०	ग्लौः	ग्लावौ	ग्लावः
द्वि०	ग्लावम्	„	„
तृ०	ग्लावा	ग्लौभ्याम्	ग्लौभिः
च०	ग्लावे	„	ग्लौभ्यः
प०	ग्लावः	„	„
ष०	„	ग्लावोः	ग्लावाम्
स०	ग्लावि	„	ग्लौषु
सम्बो०	हे ग्लौः	„	हे ग्लावः

	ए० व०	द्वि० व०	ब० व०
च०	महते	महद्भ्याम्	महद्भ्यः
पं०	महतः	,,	,,
ष०	,,	महतोः	महताम्
स०	महति	,,	महत्सु
सम्बो०	हे महन्	हे महान्तौ	हे महान्तः

भवत्—आप ।

	ए० व०	द्वि० व०	ब० व०
प्र०	भवान्	भवन्तौ	भवन्तः
द्वि०	भवन्तम्	,,	भवतः
तृ०	भवता	भवद्भ्याम्	भवद्भिः
च०	भवते	,,	भवद्भ्यः
पं०	भवतः	,,	,,
ष०	,,	भवतोः	भवताम्
स०	भवति	,,	भवत्सु
सम्बो०	हे भवन्	हे भवन्तौ	हे भवन्तः

पथिन्—मार्ग ।

	ए० व०	द्वि० व०	ब० व०
प्र०	पन्थाः	पन्थानौ	पन्थानः
द्वि०	पन्थानम्	,,	पथः
तृ०	पथा	पथिभ्याम्	पथिभिः
च०	पथे	,,	पथिभ्यः
पं०	पथः	,,	,,
ष०	,,	पथोः	पथाम्
स०	पथि	,,	पथिषु
सम्बो०	हे पन्थाः	हे पन्थानौ	हे पन्थाः

	ए० व०	द्वि० व०	ब० व०
च०	वेधसे	वेधोभ्याम्	वेधोभ्यः
पं०	वेधसः	"	"
ष०	"	वेधसोः	वेधसाम्
स०	वेधसि	"	वेधस्सु
सम्बो०	हे वेधः	हे वेधसौ	हे वेधसः

विद्वस्—विद्वान् ।

	ए० व०	द्वि० व०	ब० व०
प्र०	विद्वान्	विद्वांसौ	विद्वांसः
द्वि०	विद्वांसम्	"	विदुषः
तृ०	विदुषा	विद्वद्भ्याम्	विद्वद्भिः
च०	विदुषे	"	विद्वद्भ्यः
पं०	विदुषः	"	"
ष०	"	विदुषोः	विदुषाम्
स०	विदुषि	"	विद्वत्सु
सम्बो०	हे विद्वन्	हे विद्वांसौ	हे विद्वांसः

पुन्स्—पुरुष ।

	ए० व०	द्वि० व०	ब० व०
प्र०	पुमान्	पुमांसौ	पुमांसः
द्वि०	पुमांसम्	"	पुंसः
तृ०	पुंसा	पुम्भ्याम्	पुम्भिः
च०	पुंसे	"	पुम्भ्यः
पं०	पुंसः	"	"
ष०	"	पुंसोः	पुंसाम्
स०	पुंसि	"	पुंसु
सम्बो०	हे पुमन्	हे पुमांसौ	हे पुमांसः

अनडुह्—साँड़ ।

	ए० व०	द्वि० व०	ब० व०
प्र०	अनड्वान्	अनड्वाहौ	अनड्वाहः
द्वि०	अनड्वाहम्	,,	अनडुहः
तृ०	अनडुहा	अनडुद्भ्याम्	अनडुद्भिः
च०	अनडुहे	,,	अनडुद्भ्यः
प०	अनडुहः	,,	,,
ष०	,,	अनडुहोः	अनडुहाम्
स०	अनडुहि	,,	अनडुत्सु
सम्बो०	हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः

स्त्रीलिङ्गशब्दरूपाणि ।

वाच्—वाणी ।

	ए० व०	द्वि० व०	ब० व०
प्र०	वाक्, वाग्	वाचौ	वाचः
द्वि०	वाचम्	,,	,,
तृ०	वाचा	वाग्भ्याम्	वाग्भिः
च०	वाचे	,,	वाग्भ्यः
पं०	वाचः	,,	,,
ष०	,,	वाचोः	वाचाम्
स०	वाचि	,,	वाक्षु
सम्बो०	हे वाक्, हे वाग्	हे वाचौ	हे वाचः

क्षुध्—भूख ।

	ए० व०	द्वि० व०	ब० व०
प्र०	क्षुत्, क्षुद्	क्षुधौ	क्षुधः
द्वि०	क्षुधम्	,,	,,
तृ०	क्षुधा	क्षुद्भ्याम्	क्षुद्भिः
च०	क्षुधे	,,	क्षुद्भ्यः
पं०	क्षुधः	,,	,,
ष०	,,	क्षुधोः	क्षुधाम्
स०	क्षुधि	,,	क्षुत्सु
सम्बो०	हे क्षुत्, हे क्षुद्	हे क्षुधौ	हे क्षुधः

स्त्रीलिङ्गशब्दरूपाणि ।

वाच्—वाणी ।

	ए० व०	द्वि० व०	ब० व०
प्र०	वाक्, वाग्	वाचौ	वाचः
द्वि०	वाचम्	,,	,,
तृ०	वाचा	वाग्भ्याम्	वाग्भिः
च०	वाचे	,,	वाग्भ्यः
पं०	वाचः	,,	,,
ष०	,,	वाचोः	वाचाम्
स०	वाचि	,,	वाक्षु
सम्बो०	हे वाक्, हे वाग्	हे वाचौ	हे वाचः

क्षुध्—भूख ।

	ए० व०	द्वि० व०	ब० व०
प्र०	क्षुत्, क्षुद्	क्षुधौ	क्षुधः
द्वि०	क्षुधम्	,,	,,
तृ०	क्षुधा	क्षुद्भ्याम्	क्षुद्भिः
च०	क्षुधे	,,	क्षुद्भ्यः
पं०	क्षुधः	,,	,,
ष०	,,	क्षुधोः	क्षुधाम्
स०	क्षुधि	,,	क्षुत्सु
सम्बो०	हे क्षुत्, हे क्षुद्	हे क्षुधौ	हे क्षुधः

	ए० व०	द्वि० व०	ब० व०
	प्रावृषे	प्रावृड्भ्याम्	प्रावृड्भ्यः
	प्रावृषः	,,	,,
	,,	प्रावृषोः	प्रावृषाम्
	प्रावृषि	,,	प्रावृट्सु
न्बो०	हे प्रावृट्, हे प्रावृड्	हे प्रावृषौ	हे प्रावृषः

उपानह्—जूता।

	ए० व०	द्वि० व०	ब० व०
	उपानत्, उपानद्	उपानहौ	उपानहः
	उपानहम्	,,	,,
	उपानहा	उपानद्भ्याम्	उपानद्भिः
	उपानहे	,,	उपानद्भ्यः
	उपानहः	,,	,,
	,,	उपानहोः	उपानहाम्
	उपानहि	,,	उपानत्सु
०	हे उपानत्, हे उपानद्	हे उपानहौ	हे उपानहः

अहन्—दिन ।

ए० व०	द्वि० व०	ब० व०
अहः	अह्नी, अहनी	अहानि
,,	,, ,,	,,
अह्ना	अहोभ्यान्	अहोभिः
अह्ने	,,	अहोभ्यः
अह्नः	,,	,,
,,	अह्नोः	अह्नान्
अह्नि, अहनि	,,	अहःसु, अहस्सु
हे अहः	हे अह्नी, हे अहनी	हे अहानि

पयस्—दूध वा पानी ।

ए० व०	द्वि० व०	ब० व०
पयः	पयसी	पयांसि
,,	,,	,,
पयसा	पयोभ्यान्	पयोभिः
पयसे	,,	पयोभ्यः
पयसः	,,	,,
,,	पयसोः	पयसान्
पयसि	,,	पयस्सु
हे पयः	हे पयसी	हे पयांसि

धनुस्—चाप ।

ए० व०	द्वि० व०	ब० व०
धनुः	धनुषी	धनूंषि
,,	,,	,,
धनुषा	धनुर्भ्यान्	धनुर्भिः
धनुषे	,,	धनुर्भ्यः

अहन्—दिन ।

ए० व०	द्वि० व०	ब० व०
अहः	अह्नी, अहनी	अहानि
,,	,, ,,	,,
अह्ना	अहोभ्याम्	अहोभिः
अह्ने	,,	अहोभ्यः
अह्नः	,,	,,
,,	अह्नोः	अह्नाम्
अह्नि, अहनि	,,	अहःसु, अहस्सु
हे अहः	हे अह्नी, हे अहनी	हे अहानि

पयस्—दूध वा पानी ।

ए० व०	द्वि० व०	ब० व०
पयः	पयसी	पयांसि
,,	,,	,,
पयसा	पयोभ्याम्	पयोभिः
पयसे	,,	पयोभ्यः
पयसः	,,	,,
,,	पयसोः	पयसाम्
पयसि	,,	पयस्सु
हे पयः	हे पयसी	हे पयांसि

धनुस्—चाप ।

ए० व०	द्वि० व०	ब० व०
धनुः	धनुषी	धनूंषि
,,	,,	,,
धनुषा	धनुर्भ्याम्	धनुर्भिः
धनुषे	,,	

सर्वादि शब्दरूपाणि ।

पुंलिङ्गे

सर्व—सब ।

	ए० व०	द्वि० व०	ब० व०
प्र०	सर्वः	सर्वौ	सर्वे
द्वि०	सर्वम्	,,	सर्वान्
तृ०	सर्वेण	सर्वाभ्याम्	सर्वैः
च०	सर्वस्मै	,,	सर्वेभ्यः
प०	सर्वस्मात्, सर्वस्माद्	,,	,,
ष०	सर्वस्य	सर्वयोः	सर्वेषाम्
स०	सर्वस्मिन्	,,	,,
सम्बो०	हे सर्व	हे सर्वौ	हे सर्वे

नपुंसके

	ए० व०	द्वि० व०	ब० व०
प्र०	सर्वम्	सर्वे	सर्वाणि
द्वि०	,,	,,	,,

तृतीयादिविभक्तिषु पुंवद्रूपाणि भवन्ति ।

स्त्रीलिङ्गे ।

	ए० व०	द्वि० व०	ब० व०
प्र०	सर्वा	सर्वे	सर्वाः
द्वि०	सर्वाम्	,,	,,
तृ०	सर्वया	सर्वाभ्याम्	सर्वाभिः

अथ संख्यात्मकाः शब्दाः ।

शब्दाः	संख्या			पूरणी संख्या		
	प्रथमा	प्रथमा	प्रथमा	प्रथमा	प्रथमा	प्रथमा
	पुंलिङ्ग	स्त्री॰	न॰	पुंलिङ्ग	स्त्री॰	न॰
एक	एकः	एका	एकम्	प्रथमः	प्रथमा	प्रथमम्
द्वि	द्वौ	द्वे	द्वे	द्वितीयः	द्वितीया	द्वितीयम्
त्रि	त्रयः	तिस्रः	त्रीणि	तृतीयः	तृतीया	तृतीयम्
चतुर्	चत्वारः	चतस्रः	चत्वारि	चतुर्थः	चतुर्थी	चतुर्थम्
पञ्चन्	पञ्च	पञ्च	पञ्च	पञ्चमः	पञ्चमी	पञ्चमम्
षष्	षट्	षट्	षट्	षष्ठः	षष्ठी	षष्ठम्
सप्तन्	सप्त	सप्त	सप्त	सप्तमः	सप्तमी	सप्तमम्
अष्टन्	अष्टौ, अष्ट	अष्टौ, अष्ट	अष्टौ, अष्ट	अष्टमः	अष्टमी	अष्टमम्
नवन्	नव	नव	नव	नवमः	नवमी	नवमम्
दशन्	दश	दश	दश	दशमः	दशमी	दशमम्
एकादशन्	एकादश	एकादश	एकादश	एकादशः	एकादशी	एकादशम्
द्वादशन्	द्वादश	द्वादश	द्वादश	द्वादशः	द्वादशी	द्वादशम्

शब्दाः	संख्या			पूरणी संख्या		
	प्रथमा पुँ०	प्रथमा स्त्री०	प्रथमा न०	प्रथमा पुँ०	प्रथमा स्त्री०	प्रथमा न०
त्रयोदशन्	त्रयोदश	त्रयोदश	त्रयोदश	त्रयोदशः	त्रयोदशी	त्रयोदशम्
चतुर्दशन्	चतुर्दश	चतुर्दश	चतुर्दश	चतुर्दशः	चतुर्दशी	चतुर्दशम्
पञ्चदशन्	पञ्चदश	पञ्चदश	पञ्चदश	पञ्चदशः	पञ्चदशी	पञ्चदशम्
षोडशन्	षोडश	षोडश	षोडश	षोडशः	षोडशी	षोडशम्
सप्तदशन्	सप्तदश	सप्तदश	सप्तदश	सप्तदशः	सप्तदशी	सप्तदशम्
अष्टादशन्	अष्टादश	अष्टादश	अष्टादश	अष्टादशः	अष्टादशी	अष्टादशम्
नवदशन्,	नवदश,	नवदश,	नवदश,	नवदशः,	नवदशी	नवदशम्
ऊनविंशति	ऊनविंशतिः	ऊनविंशतिः	ऊनविंशतिः	ऊनविंशः	ऊनविंशी	ऊनविंशम्
				विंशः	विंशी	विंशम्
विंशति	...	विंशतिः	...	विंशतितमः	०तितमी	०तितमम्
				एकविंशः	एकविंशी	एकविंशम्
ति	...	एकविंशतिः	...	एकविंशतितमः	०तितमी	०तितमम्
				द्वाविंशः	द्वाविंशी	द्वाविंशम्
	...	द्वाविंशतिः	...	द्वाविंशतितमः	०तितमी	०तितमम्

शब्दाः	संख्या			पूरणी संख्या		
	प्रथमा पुं०	प्रथमा स्त्री०	प्रथमा न०	प्रथमा पुं०	प्रथमा स्त्री०	प्रथमा न०
त्रयोदशन्	त्रयोदश	त्रयोदश	त्रयोदश	त्रयोदशः	त्रयोदशी	त्रयोदशम्
चतुर्दशन्	चतुर्दश	चतुर्दश	चतुर्दश	चतुर्दश,	चतुर्दशी	चतुर्दशम्
पञ्चदशन्	पञ्चदश	पञ्चदश	पञ्चदश	पञ्चदशः	पञ्चदशी	पञ्चदशम्
षोडशन्	षोडश	षोडश	षोडश	षोडशः	षोडशी	षोडशम्
सप्तदशन्	सप्तदश	सप्तदश	सप्तदश	सप्तदशः	सप्तदशी	सप्तदशम्
अष्टादशन्	अष्टादश	अष्टादश	अष्टादश	अष्टादशः	अष्टादशी	अष्टादशम्
नवदशन्,	नवदश,	नवदश,	नवदश,	नवदशः,	नवदशी	नवदशम्
ऊनविंशति	ऊनविंशतिः	ऊनविंशतिः	ऊनविंशतिः	ऊनविंशः	ऊनविंशी	ऊनविंशम्
				विंशः	विंशी	विंशम्
विंशति	...	विंशतिः	...	विंशतितमः	०तितमी	०तितमम्
				एकविंशः	एकविंशी	एकविंशम्
एकविंशति	...	एकविंशतिः	...	एकविंशतितमः	०तितमी	०तितमम्
				द्वाविंशः	द्वाविंशी	द्वाविंशम्
द्वाविंशति	...	द्वाविंशतिः	...	द्वाविंशतितमः	०तितमी	०तितमम्

संख्याः	संख्या			पूरणी संख्या		
	प्रथमा पुं०	प्रथमा स्त्री०	प्रथमा न०	प्रथमा पुं०	प्रथमा स्त्री०	प्रथमा न०
पञ्चाशत्	...	पंचाशत्	....	पञ्चाशः, पञ्चाशत्तमः	पञ्चाशी, पञ्चाशत्तमी	पञ्चाशम्, पञ्चाशत्तमम्
षष्टि	...	षष्टिः	...	षष्टितमः	षष्टितमी	षष्टितमम्
सप्तति	...	सप्ततिः	...	सप्ततितमः	सप्ततितमी	सप्ततितमम्
अशीति	...	अशीतिः	...	अशीतितमः	अशीतितमी	अशीतितमम्
द्व्यशीति	...	द्व्यशीतिः	...	द्व्यशीतः, द्व्यशीतितमः	०ती, द्व्यशीतितमी	०तम्, द्व्यशीतितमम्
नवति		नवतिः	...	नवतितमः	नवतितमी	नवतितमम्
षण्णवति	...	षण्णवतिः	...	षण्णवतः, षण्णवतितमः	०ती, षण्णवतितमी	०तम्, षण्णवतितमम्
शत		...	शतम्	शततमः	शततमी	शततमम्
एकाधिकशत		...	एकाधिक-शतम्	एकाधिक-शततमः	० तमी	० तमम्
द्व्यधिकशत		...	द्व्यधिक-शतम्	० तमः	० तमी	० तमम्

शब्दाः	संख्या प्रथमा पुं० ए० ब०	प्रथमा स्त्री० ए० ब०	प्रथमा न० ए०	पूरणी संख्या प्रथमा पुं० ए० ब०	प्रथमा स्त्री०	प्रथमा न०
द्व्यधिकशत	...	...	द्व्यधिक-शतम्	० तमः	० तमी	० तमम्
दशाधिकशत	...	...	दशाधिक-शतम्	दशाधिक-शततमः	० तमी	० तमम्
द्वे शते	...	...	द्विशतम् द्वे शते	... द्विशततमः	...	...
त्रीणि शतानि	...	...	त्रिशतम् त्रीणि शतानि	...	...	...
सहस्रम्	....	...	सहस्रम्	सहस्रतमः	सहस्रतमी	सहस्रतमम्
लक्षम्	...	लक्षा	लक्षम्	लक्षतमः	लक्षतमी	लक्षतमम्
कोटिः	...	कोटिः	...	कोटितमः	कोटितमी	कोटितमम्
अर्बुदम्	...	...	अर्बुदम्	अर्बुदतमः	अर्बुदतमी	अर्बुदतमम्
खर्बुदम्	...	...	खर्बुदम्	खर्बुदतमः	खर्बुदतमी	खर्बुदतमम्

सामान्यभूते लुङ् ।

	ए० व०	द्वि० व०	ब० व०
पु०	अघसत्	अघसताम्	अघसन्
पु०	अघसः	अघसतम्	अघसत
पु०	अघसम्	अघसाव	अघसाम

ह्वादिगणो ।

दा ।

लुट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	दाता	दातारौ	दातारः
म० पु०	दातासि	दातास्थः	दातास्थ
उ० पु०	दातास्मि	दातास्वः	दातास्मः

लृङ् ।

प्र० पु०	अदास्यत्	अदास्यताम्	अदास्यन्
म० पु०	अदास्यः	अदास्यतम्	अदास्यत
उ० पु०	अदास्यम्	अदास्याव	अदास्याम

आशिषि लिङ् ।

प्र० पु०	देयात्	देयास्ताम्	देयासुः
म० पु०	देयाः	देयास्तम्	देयास्त
उ० पु०	देयासम्	देयास्व	देयास्म

लिट् ।

प्र० पु०	ददौ	ददतुः	ददुः
म० पु०	ददिथ, ददाथ	ददथुः	दद
उ० पु०	ददौ	ददिव	ददिम

लुङ् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	अलेखीत्	अलेखिष्टाम्	अलेखिषुः
म० पु०	अलेखीः	अलेखिष्टम्	अलेखिष्ट
उ० पु०	अलेखिषम्	अलेखिष्व	अलेखिष्म

रुधादिगणः ।

भञ्ज् ।

लुट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	भङ्क्ता	भङ्क्तारौ	भङ्क्तारः
म० पु०	भङ्क्तासि	भङ्क्तास्थः	भङ्क्तास्थ
उ० पु०	भङ्क्तास्मि	भङ्क्तास्वः	भङ्क्तास्मः

लृङ् ।

प्र० पु०	अभङ्क्ष्यत्	अभङ्क्ष्यताम्	अभङ्क्ष्यन्
म० पु०	अभङ्क्ष्यः	अभङ्क्ष्यतम्	अभङ्क्ष्यत
उ० पु०	अभङ्क्ष्यम्	अभङ्क्ष्याव	अभङ्क्ष्याम

आशिषि लिङ् ।

प्र० पु०	भज्यात्	भज्यास्ताम्	भज्यासुः
म० पु०	भज्याः	भज्यास्तम्	भज्यास्त
उ० पु०	भज्यासम्	भज्यास्व	भज्यास्म

लिट् ।

प्र० पु०	बभञ्ज	बभञ्जतुः	बभञ्जुः
म० पु०	बभञ्जिथ	बभञ्जथुः	बभञ्ज
उ० पु०	बभञ्ज	बभञ्जिव	बभञ्जिम

लुङ् ।

एक० व०	द्वि० व०	बहु० व०
[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]

अदादिगणो ।

आस् ।

लुट् ।

एक० व०	द्वि० व०	बहु० व०
आसिता	आसितारौ	आसितारः
आसितासे	आसितासाथे	आसिताध्वे
आसिताहे	आसितास्वहे	आसितास्महे

लृङ् ।

आसिष्यत	आसिष्येताम्	आसिष्यन्त
आसिष्यथाः	आसिष्येथाम्	आसिष्यध्वम्
आसिष्ये	आसिष्यावहि	आसिष्यामहि

आशिषि लिङ् ।

आसिषीष्ट	आसिषीयास्ताम्	आसिषीरन्
आसिषीष्ठाः	आसिषीयास्थाम्	आसिषीध्वम्
आसिषीय	आसिषीवहि	आसिषीमहि

लिट् ।

आसाम्बभूव, मास, चक्रे	आसाम्बभूवतुः	आसाम्बभूवुः
आसाम्बभूविथ	आसाम्बभूवथुः	आसाम्बभूव
आसाम्बभूव	आसाम्बभूविव	आसाम्बभू

[illegible] ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	[illegible]	[illegible]	[illegible]
म० पु०	[illegible]	[illegible]	[illegible]
उ० पु०	[illegible]	[illegible]	[illegible]

दिवादिगणो ।

मन ।

लुट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	मन्ता	मन्तारौ	मन्तारः
म० पु०	मन्तासे	मन्तासाथे	मन्ताध्वे
उ० पु०	मन्ताहे	मन्तास्वहे	मन्तास्महे

लृङ् ।

प्र० पु०	अमंस्यत	अमंस्येताम्	अमंस्यन्त
म० पु०	अमंस्यथाः	अमंस्येथाम्	अमंस्यध्वम्
उ० पु०	अमंस्ये	अमंस्यावहि	अमंस्यामहि

आशिषि लिङ् ।

प्र० पु०	मंसीष्ट	मंसीयास्ताम्	मंसीरन्
म० पु०	मंसीष्ठाः	मंसीयास्थाम्	मंसीध्वम्
उ० पु०	मंसीय	मंसीवहि	मंसीमहि

लिट् ।

प्र० पु०	मेने	मेनाते	मेनिरे
म० पु०	मेनिषे	मेनाथे	मेनिध्वे
उ० पु०	मेने	मेनिवहे	मेनिमहे

आशीर्लिङ् ।

	एक० व०	द्वि० व०	ब० व०
प्र० पु०	वरिषीष्ट वृषीष्ट	वरिषीयास्ताम् वृषीयास्ताम्	वरिषीरन् वृषीरन्
म० पु०	वरिषीष्ठाः वृषीष्ठाः	वरिषीयास्थाम् वृषीयास्थाम्	वरिषीध्वम् वृषीध्वम्
उ० पु०	वरिषीय वृषीय	वरिषीवहि वृषीवहि	वरिषीमहि वृषीमहि

लिट् ।

प्र० पु०	वव्रे	वव्राते	वव्रिरे
म० पु०	ववृषे	वव्राथे	ववृढ्वे
उ० पु०	वव्रे	ववृवहे	ववृमहे

लुङ् ।

१

प्र० पु०	अवृत	अवृषाताम्	अवृषत
म० पु०	अवृथाः	अवृषाथाम्	अवृढ्वम्
उ० पु०	अवृषि	अवृष्वहि	अवृष्महि

२

प्र० पु०	अवरिष्ट अवरीष्ट	अवरिषाताम् अवरीषाताम्	अवरिषत अवरीषत
म० पु०	अवरिष्ठाः अवरीष्ठाः	अवरिषाथाम् अवरीषाथाम्	अवरिध्वम्, अवरिढ्वम् अवरीध्वम्, अवरीढ्वम्
उ० पु०	अवरिषि अवरीषि	अवरिष्वहि अवरीष्वहि	अवरिष्महि अवरीष्महि

तुदादिगणी ।

लज्ज् ।

लुट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	लज्जिता	लज्जितारौ	लज्जितारः
म० पु०	लज्जितासे	लज्जितासाथे	लज्जिताध्वे
उ० पु०	लज्जिताहे	लज्जितास्वहे	लज्जितास्महे

लृङ् ।

प्र० पु०	अलज्जिष्यत	अलज्जिष्येताम्	अलज्जिष्यन्त
म० पु०	अलज्जिष्यथाः	अलज्जिष्येथाम्	अलज्जिष्यध्वम्
उ० पु०	अलज्जिष्ये	अलज्जिष्यावहि	अलज्जिष्यामहि

आशिषि लिङ् ।

प्र० पु०	लज्जिषीष्ट	लज्जिषीयास्ताम्	लज्जिषीरन्
म० पु०	लज्जिषीष्ठाः	लज्जिषीयास्थाम्	लज्जिषीध्वम्
उ० पु०	लज्जिषीय	लज्जिषीवहि	लज्जिषीमहि

लिट् ।

प्र० पु०	ललज्जे	ललज्जाते	ललज्जिरे
म० पु०	ललज्जिषे	ललज्जाथे	ललज्जिध्वे
उ० पु०	ललज्जे	ललज्जिवहे	ललज्जिमहे

लुङ् ।

प्र० पु०	अलज्जिष्ट	अलज्जिषाताम्	अलज्जिषत
म० पु०	अलज्जिष्ठाः	अलज्जिषाथाम्	अलज्जिध्वम्
उ० पु०	अलज्जिषि	अलज्जिष्वहि	अलज्जिष्महि

रुधादिगणः ।

भुज् ।

लुट् ।

	ए० व०	द्वि० व०
प्र० पु०	भोक्ता	भोक्तारौ
म० पु०	भोक्तासे	भोक्तासाथे
उ० पु०	भोक्ताहे	भोक्तास्वहे

लृङ् ।

प्र० पु०	अभोक्ष्यत	अभोक्ष्येताम्
म० पु०	अभोक्ष्यथाः	अभोक्ष्येथाम्
उ० पु०	अभोक्ष्ये	अभोक्ष्यावहि

आशिषि लिङ् ।

प्र० पु०	भुक्षीष्ट	भुक्षीयास्ताम्
म० पु०	भुक्षीष्ठाः	भुक्षीयास्थाम्
उ० पु०	भुक्षीय	भुक्षीवहि

लिट् ।

प्र० पु०	बुभुजे	बुभुजाते
म० पु०	बुभुजिषे	बुभुजाथे
उ० पु०	बुभुजे	बुभुजिवहे

लुङ् ।

प्र० पु०	अभुक्त	अभुक्षाताम्
म० पु०	अभुक्थाः	अभुक्षाथाम्
उ० पु०	अभुक्षि	अभुक्ष्वहि

क्र्यादिगणी ।

क्रिणी ।

लुट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	विक्रेता	विक्रेतारौ	विक्रेतारः
म० पु०	विक्रेतासे	विक्रेतासाथे	विक्रेताध्वे
उ० पु०	विक्रेताहे	विक्रेतास्वहे	विक्रेतास्महे

लृङ्

प्र० पु०	व्यक्रेष्यत	व्यक्रेष्येताम्	व्यक्रेष्यन्त
म० पु०	व्यक्रेष्यथाः	व्यक्रेष्येथाम्	व्यक्रेष्यध्वम्
उ० पु०	व्यक्रेष्ये	व्यक्रेष्यावहि	व्यक्रेष्यामहि

आशिषि लिङ् ।

प्र० पु०	विक्रेषीष्ट	विक्रेषीयास्ताम्	विक्रेषीरन्
म० पु०	विक्रेषीष्ठाः	विक्रेषीयास्थाम्	विक्रेषीढ्वम्
उ० पु०	विक्रेषीय	विक्रेषीवहि	विक्रेषीमहि

लिट्

प्र० पु०	विचिक्रिये	विचिक्रियाते	विचिक्रियिरे
म० पु०	विचिक्रियिषे	विचिक्रियाथे	विचिक्रियिढ्वे / विचिक्रियिध्वे
उ० पु०	विचिक्रिये	विचिक्रियिवहे	विचिक्रियिमहे

लुङ्

प्र० पु०	व्यक्रेष्ट	व्यक्रेषाताम्	व्यक्रेषत
म० पु०	व्यक्रेष्ठाः	व्यक्रेषाथाम्	व्यक्रेढ्वम्
उ० पु०	व्यक्रेषि	व्यक्रेष्वहि	व्यक्रेष्महि

या—जाना ।

	लट्	लोट्	विधिलिङ्	लङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	यायते	यायताम्	यायेत	अयायत
म० पु०	यायसे	यायस्व	यायेथाः	अयायथाः
उ० पु०	याये	यायै	यायेय	अयाये

	लुट्	लृट्	लृङ्	आशिषि लिङ्
प्र० पु०	याता	यास्यते	अयास्यत	यासीष्ट
म० पु०	यातासे	यास्यसे	अयास्यथाः	यासीष्ठाः
उ० पु०	याताहे	यास्ये	अयास्ये	यासीय

लिट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	यये	ययाते	ययिरे
म० पु०	ययिषे	ययाथे	ययिध्वे
उ० पु०	यये	ययिवहे	ययिमहे

लुङ् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	अयायि	अयायिषाताम्	अयायिषत
म० पु०	अयायिष्ठाः	अयायिषाथाम्	अयायिध्वम्
उ० पु०	अयायिषि	अयायिष्वहि	अयायिष्महि

सिच्—सींचना ।

	लट्	लोट्	विधिलिङ्	लङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	सिच्यते	सिच्यताम्	सिच्येत	असिच्यत
म० पु०	सिच्यसे	सिच्यस्व	सिच्येथाः	असिच्यथाः
उ० पु०	सिच्ये	सिच्यै	सिच्येय	असिच्ये

	लुट्	लृट्	लृङ्	आशिषि लिङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	सेक्ता	सेक्ष्यते	असेक्ष्यत	सिक्षीष्ट
म० पु०	सेक्तासे	सेक्ष्यसे	असेक्ष्यथाः	सिक्षीष्ठाः
उ० पु०	सेक्ताहे	सेक्ष्ये	असेक्ष्ये	सिक्षीय

लिट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	सिषिचे	सिषिचाते	सिषिचिरे
म० पु०	सिषिचिषे	सिषिचाथे	सिषिचिध्वे
उ० पु०	सिषिचे	सिषिचिवहे	सिषिचिमहे

लुङ् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	असेचि	असिक्षाताम्	असिक्षत
म० पु०	असिक्थाः	असिक्षाथाम्	असिग्ध्वम्
उ० पु०	असिक्षि	असिक्ष्वहि	असिक्ष्महि

दा ।

	लट्	लोट्	विविलिङ्	लङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	दीयते	दीयताम्	दीयेत	अदीयत
म० पु०	दीयसे	दीयस्व	दीयेथाः	अदीयथाः
उ० पु०	दीये	दीयै	दीयेय	अदीये
	लुट्	लृट्	लृङ्	आशिषि लिङ्
प्र० पु०	दाता	दास्यते	अदास्यत	दासीष्ट
म० पु०	दातासे	दास्यसे	अदास्यथाः	दासीष्ठाः
उ० पु०	दाताहे	दास्ये	अदास्ये	दासीय

लिट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	ददे	ददाते	ददिरे
म० पु०	ददिषे	ददाथे	ददिध्वे
उ० पु०	ददे	ददिवहे	ददिमहे

लुङ् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	अदायि	अदायिषाताम्	अदायिषत
म० पु०	अदायिष्ठाः	अदायिषाथाम्	अदायिध्वम्
उ० पु०	अदायिषि	अदायिष्वहि	अदायिष्महि

मुच्—छोड़ना ।

	लट्	लोट्	विधिलिङ्	लङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	मुच्यते	मुच्यताम्	मुच्येत	अमुच्यत
म० पु०	मुच्यसे	मुच्यस्व	मुच्येथाः	अमुच्यथाः
उ० पु०	मुच्ये	मुच्यै	मुच्येय	अमुच्ये

लिट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	चक्रे	चक्राते	चक्रिरे
म० पु०	चकृषे	चक्राथे	चकृढ्वे
उ० पु०	चक्रे	चकृवहे	चकृमहे

लुङ् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	अकारि	अकारिषाताम्	अकारिषत
म० पु०	अकारिष्ठाः	अकारिषाथाम्	अकारिध्वम्
उ० पु०	अकारिषि	अकारिष्वहि	अकारिष्महि

तुद्—पीड़ा देना ।

	लट्	लोट्	विधिलिङ्	लङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	तुद्यते	तुद्यताम्	तुद्येत	अतुद्यत
म० पु०	तुद्यसे	तुद्यस्व	तुद्येथाः	अतुद्यथाः
उ० पु०	तुद्ये	तुद्यै	तुद्येय	अतुद्ये

	लुट्	लृट्	लृङ्	आशिषि लिङ्
प्र० पु०	तोत्ता	तोत्स्यते	अतोत्स्यत	तुत्सीष्ट
म० पु०	तोत्तासे	तोत्स्यसे	अतोत्स्यथाः	तुत्सीष्ठाः
उ० पु०	तोत्ताहे	तोत्स्ये	अतोत्स्ये	तुत्सीय

लिट् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	तुतुदे	तुतुदाते	तुतुदिरे
म० पु०	तुतुदिषे	तुतुदाथे	तुतुदिध्वे
उ० पु०	तुतुदे	तुतुदिवहे	तुतुदिमहे

लुङ् ।

	ए० व०	द्वि० व०	ब० व०
प्र० पु०	अतोदि	अतुत्साताम्	अतुत्सत
म० पु०	अतुत्थाः	अतुत्साथाम्	अतुद्ध्वम्
उ० पु०	अतुत्सि	अतुत्स्वहि	अतुत्स्महि

भू—होना ।

	लट्	लोट्	विधिलिङ्	लङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	भूयते	भूयताम्	भूयेत	अभूयत

	लुट्	लृट्	लृङ्	आशिषि लिङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	भाविता, भविता	भाविष्यते, भविष्यते	अभाविष्यत, अभविष्यत	भाविषीष्ट भविषीष्ट

	लिट्	लुङ्
	ए० व०	ए० व०
प्र० पु०	बभूवे	अभावि

बुध्—जानना ।

	लट्	लोट्	विधिलिङ्	लङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	बुध्यते	बुध्यताम्	बुध्येत	अबुध्यत

	लुट्	लृट्	लृङ्	आशिषि लिङ्
	ए० व०	ए० व०	ए० व०	ए० व०
प्र० पु०	बोद्धा	भोत्स्यते	अभोत्स्यत	भुत्सीष्ट

	लिट्	लुङ्
	ए० व०	ए० व०
प्र० पु०	बुबुधे	अबोधि
